# shrI mahAtripurasundarI suprabhAtam

# શ્રીમહાત્રિપુરસુન્દરી સુપ્રભાતમ્

## Document Information

Text title : mahaatripurasundarii suprabhaatam

File name : tripurasupra.itx

Category : suprabhAta, devii, dashamahAvidyA, devI

Location : doc_devii

Author : Traditional

Transliterated by : R. Harshananda harshanand_16 at rediffmail.com

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીમહાત્રિપુરસુન્દરી સુપ્રભાતમ્

જય જય શઙ્કર

ૐ શ્રી લલિતા મહાત્રિપુરસુન્દરી પરાભટ્ટારિકા સમેતાય
શ્રી ચન્દ્રમૌળીશ્વર પરબ્રહ્મણે નમઃ ॥

ૐ ઉત્તિષ્ટોત્તિષ્ઠ દેવેશી ઉત્તિષ્ઠ શિવસુન્દરી ।
ઉત્તિષ્ઠશ્રી મહારાજ્ઞી ત્રૈલોક્યડં મઙ્ગલડં કુરુ ॥

નીરાજનેન જગદીશ્વરિ ભક્તસઙ્ઘૈઃ
નીરાજ્યસે ભુવનમઙ્ગલ સિદ્ધિહેતોઃ ।
ભક્ત્યા પ્રભાતસમયે સહવાદ્યઘોષૈઃ
સમ્સ્તૂયસે જહિહિ કૈતવ યોગનિદ્રામ્ ॥

નિદ્રા ન તે ત્રિજગદીશ્વરિ વિષ્ણુમાયે
સૃષ્ટિસ્થિતિપ્રલય કેલિષુ સડંસ્થિતાયાઃ ।
મન્મોહપાશ નિગડસ્ય વિમોક્ષણાય
સડંપ્રાર્થ્યસે જનનિ મઙ્ગલસૂક્તિભિસ્ત્વમ્ ॥

કલ્યાણશૈલનિલયે કરુણાર્ણવે શ્રી
કામેશ્વરાઙ્કનિહિતે કલિદોષહન્ત્રી ।
કાલામ્બુધાભકચબન્ધબરે મનોજ્ઞે
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥

એણાઙ્કખણ્ડયુતરત્નલસત્કિરીટે
શોણાચલેશ સહધર્મિણિ બાણહસ્તે ।
વીણાધરેણ મુનિના પરિગીયમાને
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥

ઈશાનમુખ્યસુરમૌળિલસત્પદાબ્જે
શ્રીમત્સદાશિવ મહાફલકાઢ્યમઞ્ચે ।

ઈશત્સ્મિતેન વિકસત્સુમનોહરાસ્યે
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥

લજ્જનતેન નયનેન વિલોકમાને
ત્રૈલોક્યસુન્દરતનુઙં પરશમ્ભુનાથમ્ ।
મન્દસ્મિતોલ્લસિત ચારુ મુખારવિન્દે
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥

હ્રીઙ્કારજાપસુહિતે હૃદયામ્બુજસ્થે
હાર્દાન્ધકારવિનિહન્ત્રિ હરિત્પતીઢ્યે ।
હર્યક્ષવાહિનિ હલાયુધ સેવિતાઙ્ઘ્રે
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥

હસ્તેન દેવિ ફણિપાશમથેક્ષુચાપમ્
પુષ્પાસ્ત્રમઙ્કુશવરઙં સતતઙં દધાને ।
હેમાદ્રિતુઙ્ગતરશૃઙ્ગ કૃતાધિવાસે
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥

સર્વાગમોપનિષદીઢ્ય મહાપ્રભાવે
સામાભિગાનવિનુતે સરસીરુહાક્ષિ ।
સચ્ચિત્સુખૈકરસિકે સકલેષ્ટદાત્રી
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥

કલ્યાણદાત્રિ કમનીયગુણાર્ણવે શ્રી
કલ્માષપાદપરિપૂજિત પાદપદ્મે ।
કૈવલ્યદે કલિમલાપહ ચિત્સ્વરૂપે
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥

હત્વાઽસુરેન્દ્રમતિબાહુબલાવલિપ્તમ્
ભણ્ડઙં પ્રચણ્ડસમરોદ્યતમાત્તશસ્ત્રમ્ ।
સમ્રક્ષિત ત્રિજગતિ ત્રિપુરાધિવાસે
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥

લબ્ધુઙં તવ ત્રિપુરસુન્દરિ સત્કટાક્ષમ્
કારુણ્યપૂર્ણમમરેશમુખાદિગીશાઃ ।
કક્ષ્યાન્તમેત્ય નિવસન્તિ તવ પ્રબોધે
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥

હ્રીમિત્યજસ્રમપિ તે મનુમાદરેણ
હૃત્પઙ્કજેનુકલયન્ પ્રજપામિ નિત્યમ્ ।
હર્ષપ્રદે હૃદયસન્તમસાપહન્ત્રી
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥

સત્યાત્મિકે સકલલોકહિતપ્રદેઽમ્બ
સમ્પત્કરી કિટમુખી પરિસેવિતાઙ્ઘ્રે ।
સર્વાનવદ્યચરિતે સુકુમારગાત્રિ
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥

કામોહિ તેઽમ્બ કરુણાલવમેવ લબ્ધ્વા
પુષ્પાયુધોઽપિ ભવતિ ત્રિજગદ્વિજેતા ।
કામેશ્વરેણ પરિકાઙ્ક્ષિત સત્કટાક્ષે
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥

લજ્જાપદાઙ્કિત મનુપ્રતિપાદ્યરૂપે
લીલાવિલોકન વિસૃષ્ટજગત્સહસ્રે ।
લાવણ્યપૂર્ણવદને લલિતાભિધાને
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥

હ્રીઙ્કારમન્ત્રનિલયે હૃદિભાવનીયે
હ્રીઙ્કારગર્ભમનુજાપક સિદ્ધિદાત્રિ ।
હ્રીઙ્કારમન્ત્રમહનીય નિજસ્વરૂપે
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥

શ્રીશઙ્કરાર્ચિતપદે શિવભાગધેયે
શ્રીકામરાજમહિષિ શ્રિતકામધેનો ।
શ્રીશઙ્કરસ્યકુલમઙ્ગલદેવતેઽમ્બ
શ્રીમન્મહાત્રિપુરસુન્દરિ સુપ્રભાતમ્ ॥

શ્રી સુપ્રભાતમહિત સ્તવમમ્બિકાયાઃ
ભક્ત્યા પ્રભાતસમયે ભુવિ યે પઠન્તિ ।
શ્રી માત્રનુગ્રહનિરસ્તસમસ્ત ખેદાઃ
સચ્ચિત્સુખાત્મક પદઙ્ પ્રવિશન્તિ સત્યમ્ ॥

મુનીન્દ્રનારદાગસ્ત્ય માન્યાયૈ જય મઙ્ગલમ્ ।

પ્રણતાર્તિનિવારિણ્યૈ પૂર્ણાયૈ શુભમઙ્ગલમ્ ॥

વિવિધોપનિષદ્વેતૃ વેદ્યાયૈ જય મઙ્ગલમ્ ।
શુદ્ધબુદ્ધસદાનન્દ બ્રહ્મણે શુભ મઙ્ગલમ્ ॥

નતલોકેષ્ટદાયિન્યૈ નિત્યાયૈ નિત્ય મઙ્ગલમ્ ।
સર્વમઙ્ગલયુક્તાયૈ સત્યાયૈ સર્વ મઙ્ગલમ્ ॥

સર્વબ્રહ્માણ્ડસન્દોહ જનન્યૈ જય મઙ્ગલમ્ ।
શઙ્કરાર્ચિતપાદાયૈ શિવાણ્યૈ શુભમઙ્ગલમ્ ॥

શ્રીચક્રરાજનિલયાયૈ શ્રીમાત્રે જય મઙ્ગલમ્ ।
મહાત્રિપુરસુન્દર્યૈ શિવાયૈ શુભમઙ્ગલમ્ ॥

॥ ઇતિ શ્રી શઙ્કરાનન્દનાથ વિરચિતં
શ્રી મહાત્રિપુરસુન્દરી સુપ્રભાતં સમાપ્તમ્ ॥ ૐ ॥

Encoded by R. Harshananda harshanand_16@rediffmail.com

*shrI mahAtripurasundarI suprabhAtam*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*